www.prepp.in

Your Personal Exams Guide



## भाग – IV

## भाषा – I

## संस्कृतम्

अभ्यर्थिनः **चतुर्थ भागस्य** (Part-IV) प्रश्नानाम् (**प्र.सं.** 91-120) उत्तरं दद्युः, यदि तैः **संस्कृतं प्रथमभाषा**–रूपेण (Language-I) चितम् ।

**संकेत : अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (91 - 99) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत :**

पावनसलिला नर्मदा अस्माकं प्रदेशस्य जीवनदायिनी सरित् अस्ति । एषा एव रेवा इति नाम्नापि प्रसिद्धा । अस्या तटे अनेकानि तीर्थस्थानानि सन्ति । प्राचीनकालादेव अस्याः तटे तपस्विनां स्थानानि सन्ति । अतः नर्मदायाः परिक्रमणं कृत्वा जनाः आत्मानं धन्यं मन्यन्ते । अत्रत्यं नैसर्गिकं सौन्दर्यं दर्शनीयम् ।

अनूपपुरमण्डले अमरकण्टकं नाम पर्वतोऽस्ति । तत एव नर्मदा प्रादुर्भवति । तदनन्तरम् एषा गहनेषु अरण्येषु उत्तुंङ्गपर्वतेषु भ्रमणं कुर्वती डिण्डोरीमण्डलं प्रविशति । डिण्डोरीतः सर्पाकारगत्या उच्चावचमार्गेण महाराजपुरं प्राप्नोति । ततः जाबालिपुरम् आगच्छति । श्वेतशिलाखण्डानां कृते प्रसिद्धे मेडाघाटनामके स्थाने धूमधारजलप्रपातस्वरूपं धारयति । तदवलोकनार्थं बहवाः पर्यटकाः अत्र आगच्छन्ति ।

नर्मदा नद्यामेव बरगी–इन्दिरासागर – सरदारसरोवरादयः बन्धाः निर्मिताः सन्ति । एभिः बन्धैः विद्युदुत्पादनं, भूमिसेचनं, जलपरिवहनं, अभयारण्यनिर्माणम् पर्यटनस्थल निर्माणम् इत्यादयो विविधलाभाः भवन्ति ।

**91.** **जना किं कृत्वा आत्मानं धन्यं मन्यन्ते ?**

(1) नर्मदायाः परिक्रमणं कृत्वा

(2) खर्जूरवृक्षमारुह्य

(3) आकण्ठं भोजनं कृत्वा

(4) तटे शयनं कृत्वा

**92.** **उद्भवति पदस्य समानार्थकशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः । तच्चित्वा लिखत**

(1) वेगेन धावति

(2) प्रादुर्भवति

(3) नृत्यं करोति

(4) सम्मोहितं करोति

**93.** **नर्मदायाः अपरं नाम अपि अनुच्छेदे प्रयुक्तः तच्चित्वा लिखत**

(1) सुता

(2) रेवा

(3) तटं

(4) सिंही

**94.** **अमरकण्टकं नाम पर्वतः कुत्र अस्ति ?**

(1) नूपुर मण्डले

(2) प्रभामण्डले

(3) अनूपपुरमण्डले

(4) शृगालस्य गुहायाम्

www.prepp.in
Prepp Your Personal Exams Guide



95. डिण्डोरी–स्थानात् इत्यस्य कृते कः शब्दः अनुच्छेदे प्रयुक्तः ? तच्चित्वा लिखत

(1) डिण्डोरीतः
(2) मेहरौलीतः
(3) कावेरीतः
(4) मनोहरस्यगृहतः

96. तद्द्रष्टुम् इत्यस्य कृते कः शब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः ?

(1) तदवलोकनार्थम्
(2) तस्मात् भीतः
(3) आकाशात् पतितम्
(4) केशवं प्रति

97. 'उत्तुङ्गपर्वतेषु' पदे का विभक्तिः ?

(1) प्रथमा
(2) सप्तमी
(3) चतुर्थी
(4) तृतीया

98. 'बन्धाः' इति पदे किं वचनम् ?

(1) बहुवचनम्
(2) श्रृगालवचनम्
(3) एकवचनम्
(4) द्विवचनम्

99. का जीवनदायिनी सरित् अस्ति ?

(1) छाता
(2) नर्मदा
(3) केलिका
(4) मल्लिका

अधोलिखितान् श्लोकान् पठित्वा प्रश्नानां (100 – 105) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत –

विकृतिं नैव गच्छन्ति सङ्गदोषेण साधवः ।
आवेष्टितं महासर्पैः चन्दनं न विषायते ।।

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्द् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम् ।।

चिन्तनीया विपदायादावेव प्रतिक्रिया
न कूपखननं युक्तं प्रदीप्ते वहिनना गृहे ।।

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात्फलं नास्ति छाया केन निवार्यते ।।

सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनम् ।
सर्पो दशति कालेन दुर्जनस्तु पदे पदे ।।

यस्मिन् देशे न सम्मानो न प्रीतिर्न च बान्धवाः
न च विद्यागमः कश्चित् न तत्र दिवसं वसेत् ।।

100. केषां मनसि वचसि कर्मणि च ऐक्यम् भवति ?

(1) दुन्दुभीनाम्
(2) महात्मनाम्
(3) क्रीडनकानाम्
(4) फलक्रेतॄणाम्

101. वह्निना प्रदीप्ते गृहे किं न युक्तं भवति ?

(1) जलसंरक्षणम्
(2) कूपखननम्
(3) केवलं धावनम्
(4) क्षौरकर्म

www.prepp.in



**102. तव्यत् प्रत्यययुतः शब्दः कः ?**

(1) सेवनीयः

(2) सेवितव्यः

(3) पठनीयः

(4) पर्वतः

**103. दशनं करोति इति पदस्य समानार्थक शब्दः श्लोके प्रयुक्तः तच्चित्वा लिखत**

(1) खादति

(2) भक्षयति

(3) दशति

(4) खादनं करोति

**104. यस्मिन् स्थाने इति पदस्य कृते कः शब्दः श्लोके प्रयुक्तः तच्चित्वा लिखत**

(1) यस्मिन् तडागे

(2) यस्मिन् सरोवरे

(3) यस्मिन् देशे

(4) यस्मिन् वृक्षे

**105. सङ्गदोषेण के विकृतिं न गच्छन्ति ?**

(1) मानवाः

(2) जन्तवः

(3) साधवः

(4) धुन्धकारिण्यः

**106. मातृभाषाधारित – बहुभाषावादः नाम किम् ?**

(1) केवलं मातृभाषायाः अधिगमः

(2) मातृभाषामाध्यमेन अधिगमः ।

(3) प्रथमं मातृभाषायाः अधिगमः तदनन्तरम् अधिकानां भाषाणां योगः

(4) अनेकभाषाणां विदेशिभाषाणां च मातृभाषारूपेण अध्ययनम् ।

**107. विद्यालयिभाषा शिक्षानीतिः (Language-in-school education policy) ज्ञायते _______**

(1) बहुभाषिशिक्षा इति ।

(2) शिक्षायां भाषा इति ।

(3) मातृभाषा धारित–बहुभाषावादः इति ।

(4) त्रिभाषासूत्रम् इति ।

**108. समुच्चयभाषा–उपागमः (Whole Language approach) अस्ति ______**

(1) विद्यार्थिनां भाषाधिगमः भवति अक्षरध्वनिज्ञानानन्तरं शब्दानां, शब्दसमूहानां, वाक्यानां च ज्ञानेन इति अवधारणा ।

(2) विद्यार्थिनां भाषाधिगमः भवति भाषिकखण्डेभ्यः (Language chunks) अनन्तरं ते वर्णानाम् अक्षराणां च बोधं कुर्वन्ति इति अवधारणा ।

(3) भाषाधिगमस्य आरम्भः भवति लघुतमेन एककेन वर्णमालायाः अक्षरेण इति अवधारणा ।

(4) सर्वाः भाषाः समानमार्गेण एव अधिगम्यन्ते इति अवधारणा ।

www.prepp.in

Prepp
Your Personal Exams Guide



**109. भाषाधिगमार्थं कण्ठस्थीकरणम् अङ्गरूपेण भाषाशिक्षणस्य कः उपागमः स्वीकरोति ?**

(1) संरचनात्मकोपागमः (Structural Approach)

(2) व्याकरणानुवादपद्धतिः (Grammar and Translation Method)

(3) सम्प्रेषणात्मकोपागमः (Communicative Approach)

(4) सम्पूर्णशारीरिकप्रतिक्रिया (Total Physical Response)

**110. काव्या एका भाषाशिक्षिका अस्ति । सा विषयानुगुणं शब्दानाम् आहरणं कर्तुं तेषां सहगामिशब्दानां च आहरणं कर्तुं छात्रान् निर्दिशति । एषा योजना / पद्धतिः ज्ञायते _____**

(1) विन्यासः इति (Collocation)

(2) शब्दजालः इति (Word Web)

(3) शब्दक्रीडा इति (Word Play)

(4) शब्दनिर्माणः इति (Word Formation)

**111. छात्राणां भाषादक्षतायाः परीक्षणं कर्तुं शिक्षिका एकं प्रश्नपत्रं प्रस्तौति । तस्मिन् सा प्रत्येकं पञ्चमं पदं प्रत्याहृत्य एकं परिच्छेदं ददाति छात्रान् पञ्चमं तत् रिक्तस्थानं पूरयितुं छात्रान् निर्दिशति । एवम्प्रकारकः परीक्षाविधिः ज्ञायते _______**

(1) अवबोधपूर्वकं पठनम् इति (Reading Comprehension)

(2) शब्दज्ञानपरीक्षा इति (Vocabulary Testing)

(3) शून्यस्थानपूरणम् इति (Fill in the blanks)

(4) क्लोज़परीक्षा इति (Cloze test)

**112. सम्भाषणसमये उचितेन उच्चारणेन सह समुचितशब्दानां समुचितक्रमेण प्रयोगः ।**

(1) सङ्केतभाषा (Body Language)

(2) सम्भाषणप्रक्रिया (Mechanics of Speaking)

(3) भाषाव्यापारः (Language Function)

(4) प्रयोगाधारितभाषा (Language in Use)

**113. कथाकथनम् एकं शिक्षणशास्त्रीयम् उपकरणम् अस्ति । तस्य उपयोगः क्रियते ______**

(1) श्रवणकतिविधौ छात्रान् नियोजयितुम् ।

(2) छात्राणां सम्भाषणकौशलस्य विकासार्थम् ।

(3) भाषासाहित्यकौशलस्य विकासार्थम् ।

(4) कक्षायाम् अनुशासनं पालयितुम् ।

**114. ससन्दर्भं व्याकरणम् (Language in context) नाम –**

(1) पुनः पुनः अभ्यासबलेन व्याकरणस्य अधिगमनम् ।

(2) पूर्वम् रूपाणाम् ज्ञानम् अनन्तरं प्रयोगं प्रति प्रवृत्तिः

(3) स्वाभाविकभाषायाः उदाहरणेषु रूपाणां परिचयः तथा च सन्दर्भे तेषाम् अध्ययनम् ।

(4) व्यवस्थितसंरचनामाध्यमेन रूपाणाम् अधिगमनम् येन विद्यार्थी क्रमशः विकासं प्राप्नोति ।

**115. अधोलिखितेषु कस्य कौशलविकासार्थं लेखनम् इत्यस्मिन् ग्रहणं न भवेत् ?**

(1) व्याख्यानसमये टिप्पणीसङ्कलनम् (Note taking)

(2) पठनसमये टिप्पणीलेखनम् (Note making)

(3) सारांशलेखनम् (Synopsis writing)

(4) कस्यचित् कार्यक्रमस्य कृते योजनापत्रलेखनम् (Writing Agenda)

**116. पाठ्यपुस्तकनिर्मातारः वृत्तपत्र–पत्रिकादि–मूललेखेभ्यः पाठान्, कविताः वर्णनानि समाहृत्य पाठ्यपुस्तकेषु नियोजयन्ति किमर्थम् ?**

(1) तेषु विश्वसनीया (authentic) स्वाभाविकी च भाषा विद्यते ।

(2) पाठ्यपुस्तकनिर्मातृभ्यः तानि रोचन्ते ।

(3) अभ्यासप्रश्नानां निर्माणे तेषाम् उपयोगिता भवति ।

(4) तानि पठनार्थम् उपयोगीनि भवन्ति ।

**117. शिक्षकः एकं पाठं स्वगत्या पठति । विद्यार्थिनः समूहेषु विभज्य मुख्यबिन्दून् आदाय पाठस्य पुनर्निर्माणं कुर्वन्ति । एवंविधं कार्यम् अस्ति ________**

(1) श्रुतलेखः (Dictation)

(2) व्याकरणश्रुतलेखः (Grammar Dictation)

(3) कार्यस्य पुनर्लेखनम् (Rewriting Task)

(4) पारस्परिकश्रुतलेखः (Mutual Dictation)

**118. प्रथम भाषा विकासः साधारणतया ज्ञायते ____**

(1) अधिगमः इति (Learning)

(2) अधिग्रहणम् इति (Acquisition)

(3) परिवर्धनम् इति (Development)

(4) संज्ञानम् इति (Cognition)

**119. कस्याश्चित् शिक्षिकायाः कक्षायां छात्राणां मातृभाषाः विभिन्नाः सन्ति । सा प्रत्येकं छात्रं स्व–स्वभाषया परस्परम् अभिवादयितुं निर्दिशति । प्रतिदिनं छात्राः विभिन्नभाषाणां शब्दैः सह परिचयार्थं प्रयत्नशीलाः भवन्ति । एवं शिक्षिका साधनरूपेण अधोलिखितेषु कतमम् आश्रयति ।**

(1) संसाधनरूपेण बहुभाषावादः (Multilingualism as a resource)

(2) बहुभाषिकता (Poliglotism)

(3) योजनारूपेण विभिन्नता (Diversity as a strategy)

(4) भाषैक्यवादः (Monolingualism)

**120. विद्यार्थिभ्यः एकस्याः भाषायाः परिचयार्थं कतमः मार्गः न समुचितः ?**

(1) अन्त्यानुप्रासकविताभिः गीतैः च ।

(2) शब्दैः लघुवाक्यैः च ।

(3) वर्णमालायाः अक्षराणां शिक्षणेन ।

(4) मौखिक–श्राविकादानप्रदानद्वारा ।

**भाग – V**
**भाषा – II**
**संस्कृतम्**

अभ्यर्थिनः **पञ्चमभागस्य** (Part-V) प्रश्नानाम् (**प्र.सं.** 121-150) उत्तरं दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा** (Language-II) रूपेण चितम् ।

**निर्देश : अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां (121 – 128) विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत –**

वृद्धः पिता स्वपुत्रान् कृषिकर्मणः सञ्चालनाय भूयोभूयः प्रेरयति । किन्तु सर्वेऽपि अलसाः पुत्राः न शृण्वन्ति । एकदा स वार्धक्यजनितेन रोगेण ग्रस्तः शय्यासीनो जातः । सः कलहायमानेषु पुत्रेषु सङ्घबद्धतायाः महत्त्वं बोधनाय उपायमचिन्तयत् । सर्वानपि पुत्रान् आहूय स एकस्मै सुबद्धं दण्डचतुष्टयं दत्वा अवदत् – त्वमेनं भञ्जय । स कथमपि भङ्क्तुं नाशक्नोत् । तदा अपरः पुत्रः तथैव आदिष्टः । सोऽपि तद्दण्डचतुष्टयं भङ्क्तुं समर्थो न जातः । इयमेव दशा अपरद्वयोः पुत्रयोः अपि अभवत् । तदा वृद्धः पिता सुबद्धं दण्डचतुष्टयं निर्बध्य एकैकं दण्डं पुत्रेभ्यः दत्तवान् । तं दण्डं चोटयितुं स सर्वानपि आदिष्टवान् । सर्वे पुत्राः स्वस्वहस्तस्थितं दण्डं भङक्तुं समर्थाः अभवन् । तदा पिता कथितवान् यदि यूयं पृथक् पृथक् तिष्ठथ तदा कश्चित् शत्रुः युष्मान् एकैकान् विनाशयिष्यति । यदि यूयं सर्वे मिलित्वा सुबद्धाः तिष्ठथ तदा कोऽपि बाह्यजनः युष्मान् विनाशयितुं समर्थः न भविष्यति । तस्मात् दिवसात् सर्वेऽपि चत्वारः पुत्राः स्वस्वविचारान् त्यक्त्वा परस्परं मिलित्वा गृहेऽवसन् । पितरं च सेवया स्वस्थम् अकुर्वन् ।

**121.** **'आवाहनं कृत्वा' इत्यर्थे कः शब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः ?**

(1) आदिशत्

(2) आहूय

(3) आज्ञापयत्

(4) अधावत्

**122.** **अधोलिखितेषु पदेषु तुमुन् प्रत्ययान्तपदं चिनुत :**

(1) भुक्त्वा

(2) पीत्वा

(3) भङ्क्तुम्

(4) लिखित्वा

**123.** **अधोलिखितेषु पदेषु क्त्वा प्रत्ययान्तपदं चिनुत :**

(1) आदाय

(2) द्रष्टुम्

(3) दत्वा

(4) अनुशासनम्

**124.** **पुत्रेभ्यः इति पदे अनुच्छेदानुसारेण का विभक्तिः ?**

(1) प्रथमा

(2) द्वितीया

(3) तृतीया

(4) चतुर्थी

**125. सुबद्धं दण्डचतुष्टयं कथं कृत्वा एकैकं दण्डं पिता पुत्रेभ्यः अयच्छत् ?**

(1) निर्बन्ध्य

(2) त्वगपवार्य

(3) जलेन अभिसिञ्च्य

(4) नीराजनं कृत्वा

**126. यूयम् इति पदम् कस्मिन् पुरुषे अस्ति ?**

(1) प्रथम पुरुषे

(2) मध्यम पुरुषे

(3) उत्तमपुरुषे

(4) वृद्धपुरुषे

**127. 'गृहीत्वा' इति पदस्य विपरीतार्थकपदम् अनुच्छेदेऽस्मिन् प्रयुक्तः । तच्चित्वा लिखत**

(1) त्यक्त्वा

(2) दृष्ट्वा

(3) संहृत्य

(4) आदाय

**128. स्वपुत्रान् भूयोभूयः कः प्रेरयति ?**

(1) माता

(2) वृद्धः पिता

(3) भ्राता

(4) मित्रम्

**अधोलिखितं गद्यांशं पठित्वा तदाधारित – प्रश्नानां (129 - 135) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत –**

एकदा दरिद्रेभ्यः दातुं कम्बलाः नृपेण चाणक्याय समर्पिताः । चाणक्यस्य उटजं नगराद् बहिः आसीत् । केचन चौराः कम्बलान् अपहर्तुं चिन्तितवन्तः । ते रात्रौ चाणक्यस्य उटजं प्राविशन् । तत्र अतीव शैत्यम् आसीत् । चाणक्यः कटे सुप्तः आसीत् । पार्श्वे कम्बलानां राशिः आसीत् । चौराणाम् आश्चर्यम् । चाणक्यः कम्बलं विना निद्रां करोति । चौराः चौरकर्म न अकुर्वन् । ते चाणक्यं प्रबोधितवन्तः । चौराः–चाणक्य महोदय ! पार्श्वे कम्बलानां राशिः । शीतकालोऽपि वर्तते । तथापि त्वं किमर्थं भूमौ शयनं करोषि ? चाणक्यः उक्तवान् – कम्बलाः दरिद्रेभ्यः दानाय नृपेण दत्ताः । श्वः प्रभाते वितरणं करिष्यामि । तेषां उपयोगाय नास्ति ममाधिकारः । अहं विरक्तः सदा तृप्तः । इति श्रुत्वा चौराणां लज्जा उत्पन्ना । अन्येषां वस्तुनाम् उपयोगेन अधर्मः भवति ।

**129. 'प्रवेशमकुर्वन्' इति पदस्य कृते किं पदम् अनुच्छेदेऽस्मिन् प्रयुक्तः ?**

(1) आदिशन्

(2) प्राविशन्

(3) अशिक्षयन्

(4) अपश्यन्

**130. 'सुप्तः' इति पदे कः प्रत्ययः प्रयुक्तः ?**

(1) क्त्वा

(2) तुमुन्

(3) क्त

(4) घञ्

**131. 'समीपे' इति पदस्य समानार्थकशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखत –**

(1) दूरे

(2) अतिदूरे

(3) पार्श्वे

(4) अन्यस्मिन् ग्रामे

**132. चाणक्यः कुत्र शयनं करोति स्म ?**

(1) पर्यङ्के

(2) वृक्षे

(3) जले

(4) भूमौ

**133. 'दरिद्रेभ्यः' इत्यस्मिन् पदे का विभक्तिः अनुच्छेदमाधृत्य लिखत –**

(1) प्रथमा

(2) द्वितीया

(3) सप्तमी

(4) चतुर्थी

**134. 'सायंकाले' इति पदस्य विलोमशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः तच्चित्वा लिखत –**

(1) मध्याह्नकाले

(2) अपराहणकाले

(3) प्रभाते

(4) रात्रिकाले

**135. चाणक्याय कम्बलाः केन दत्ताः ?**

(1) मनोहरेण

(2) नृपेण

(3) भृत्येन

(4) चौरेण

**136. संविधानस्य 343(2) – अनुच्छेदानुसारम् _____**

(1) हिन्दी राजकीयभाषा अस्ति।

(2) हिन्दी सहायकराजकीयभाषा अस्ति।

(3) आङ्गलभाषा राजकीयभाषा अस्ति

(4) आङ्गलभाषा सहायकराजकीयभाषा अस्ति।

**137. अधस्तनेषु अभिजातभाषायाः (Classical language) किं निकषं नास्ति ?**

(1) भाषायाः 1500–2000 वर्षपुरातनः इतिहासः लिखित – साहित्यम् अस्ति।

(2) भाषायाः कानिचन प्राचीनसाहित्यानि महाकाव्यानि सन्ति।

(3) भाषा अनुसूचितभाषावर्गे (Scheduled language) न स्यात्।

(4) भाषायाः मौलिकसाहित्यपरम्परा स्यात् इतरभाषावर्गेभ्यः उद्धृतसाहित्यं न स्वीकुर्यात्।

**138. विद्यार्थिनां श्रवणकौशलस्य आकलनं कर्तुं शक्यते _____**

(1) प्रतिदिनं पुनःपुनः अभ्यासद्वारा ।

(2) कथायाः वर्णनं कृत्वा तदुपरि बोधपरकप्रश्नैः ।

(3) अधिकं मौनवाचनार्थम् अवसरप्रदानेन ।

(4) छात्रान् भ्रमणार्थं बहिः नीत्वा ।

**139. पठनस्य प्रारम्भिकस्थितौ शिक्षकः ध्यानं दधात् –**

(1) भाषायाः वर्णमालायाः कण्ठस्थीकरणे ।

(2) पठनस्यप्रवाहे ।

(3) अक्षर–ध्वनि–समन्वये

(4) पठनस्यशुद्धतायाम्

**140. श्रवणं पठनं चैव**

(1) ग्रहणात्मककौशले

(2) अभिव्यक्त्यात्मककौशले

(3) रुच्युत्पादककौशले

(4) चिन्तनात्मककौशले

**141. युवलेखकानाम् आवश्यकतानुसारं शिक्षकाः प्रतिक्रियां कुर्यात् _____**

(1) तैः कृतानां व्याकरणगतत्रुटीनां विस्तृतप्रतिपुष्टिं दत्त्वा ।

(2) तैः सम्यक् कार्यं कृतम् इति प्रशंसां कृत्वा तेषां कृतिभ्यः उद्धरणं कृत्वा विशिष्टटिप्पणीं च दत्त्वा ।

(3) त्रुटीनाम् उपेक्षां कर्तुं निर्दिश्य ।

(4) कक्षायां तेषाम् उत्तमलेखनार्थं सम्माननं कृत्वा ।

**142. अधस्तनेषु किं भाषाधिग्रहणाधिगमयोः मूलभूतं पार्थक्यं वर्तते ?**

(1) प्रवाहः शुद्धता च (Fluency and Accuracy)

(2) भाषायाः साम्मुख्यम् (Exposure to language)

(3) शुद्धता वेगः च (Accuracy and pace)

(4) वेगः उच्चारणम् च (Pace and Pronunciation)

**143. मातृभाषायाः संसाधनरूपेण प्रयोगदृष्ट्या अधोलिखितेषु का उक्तिः न समीचीना ?**

(1) एषा बालानाम् अधिगमे चिन्तने सम्प्रेषणे च साहाय्यं करोति ।

(2) तेषाम् अर्थबोधप्रक्रियायाम् मातृभाषा गुणात्मकभूमिकां निर्वहति ।

(3) शिक्षणविधीनां विस्तारार्थं मातृभाषा साहाय्यं करोति ।

(4) द्वितीयभाषायाः उपेक्षां कर्तुं मातृभाषा साहाय्यं करोति ।

**144. प्राथमिकस्तरे बालस्य भाषाविकासार्थं सर्वतो महत्त्वपूर्णम् अस्ति _____**

(1) व्याकरणस्य ज्ञानम्

(2) भाषासमृद्धं वातावरणम्

(3) भाषायाः पाठ्यपुस्तकम्

(4) बालस्य आकलनम्

**145. पत्राधानम् (Portfolio) एकम् उदाहरणम् अस्ति ______**

(1) स्वतः आकलनस्य

(2) शिक्षकाकलनस्य

(3) उभयं स्वतः आकलनस्य शिक्षकाकलनस्य च

(4) राज्यबोर्ड द्वारा आकलनस्य

**146. वर्गप्रहेलिका (Crossord) क्रीडा वर्धयति**

(1) श्रवणकौशलम् ।

(2) लेखनकौशलम् ।

(3) शब्दज्ञानम्

(4) साहित्यिकम् अर्थम् ।

**147. सम्भाषणकौशलस्य गतिविधेः आकलनसमये अधोलिखितेषु किं न आवश्यकम् ?**

(1) ध्वनीनां / शब्दानाम् उच्चारणम्

(2) सन्दर्भे आगतानां शब्दानाम् उचितरूपाणां प्रयोगः

(3) शब्दकोषस्य उपयोगः

(4) भाषणे स्पष्टता

**148. भाषायाः अक्षर–ध्वनिसम्बन्धस्थापन द्वारा पठनस्य अध्यापनम् अस्ति ______**

(1) प्रत्यक्षविधिः (Direct Method)

(2) शाब्दिकविधिः (Phonic Method)

(3) समग्रभाषाविधिः (Whole-language Method)

(4) आंशिकभाषाविधिः (Part-language Method)

**149. पाठ्यपुस्तकाद् बहिर्गमनम् (Going beyond Textbook) इत्युक्ते ______**

(1) पाठ्यपुस्तकम् अतिरिच्य पूरकपाठनसामग्रीणां प्रबन्धनम्

(2) पाठ्यपुस्तकस्य उपेक्षां कृत्वा ततः बहिर्गमनम् ।

(3) पाठ्यपुस्तककेन्द्रितज्ञानम् स्यात् ।

(4) पाठ्यपुस्तकात् बहिर्गमनं कृत्वा छात्राणां भारम् अधिकं न वर्धयेत् ।

**150. शिक्षकः तृतीयकक्षायाः विद्यार्थिनः एकम् आवरकं (envelop) निर्मातुं निर्देशं ददाति । विद्यार्थी निर्देशस्य पालनं करोति । भाषाकक्षायाम् एवंविधः गतिविधिः साहाय्यं करिष्यति ______**

(1) लेखनकौशलविकासे

(2) सम्भाषणकौशलविकासे

(3) श्रवणकौशलविकासे

(4) तेषां सर्जनात्मकतायाः विकासे

